# Shri Stambhavirbhava Narasimha Stotram

# શ્રીસ્તમ્ભાવિર્ભાવનરસિંહસ્તોત્રમ્

## Document Information

```
Text title : Stambhavirbhava Narasimha Stotram
File name : stambhAvirbhAvanarasiMhastotram.itx
Category : vishhnu
Location : doc_vishhnu
Acknowledge-Permission: shrIchakravartula sudhanvAchArya
Latest update : April 22, 2021
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

April 22, 2021

*sanskritdocuments.org*

# શ્રીસ્તમ્ભાવિર્ભાવનરસિંહસ્તોત્રમ્

સહસ્રભાસ્કરસ્ફુરત્પ્રભાક્ષદુર્નિરીક્ષણં
    પ્રભગ્નક્રૂરકૃદ્ધિરણ્યકશ્યપોરુરસ્થલમ્ ।
અજસ્રજાણ્ડકર્પરપ્રભગ્નરૌદ્રગર્જન-
    મુદગ્રનિગ્રહાગ્રહોગ્રવિગ્રહાકૃતિં ભજે ॥ ૧॥

સ્વયમ્ભુશમ્ભુજમ્ભજિત્પ્રમુખ્યદિવ્યસમ્ભ્રમં
    દ્વિજૃમ્ભમધ્યદુત્કટોગ્રદૈત્યકુમ્ભકુમ્ભિનિન્- ।
-અનર્ગલાટ્ટહાસનિસ્પૃહાષ્ટદિગ્ગજાર્ભટિન્
    યુગાન્તિમાન્તમત્કૃતાન્તધિક્કૃતાન્તકં ભજે ॥ ૨॥

જગજ્જ્વલદ્દહદ્ગ્રસત્પ્રહસ્ફુરન્મુખાર્ભટિં
    મહદ્ભયદ્ભવદ્દહગ્રસલ્લસત્કૃતાકૃતિમ્ ।
હિરણ્યકશ્યપોસહસ્રસંહરત્સમર્થકૃ-
    -ન્મુહુર્મુહુર્મુહુર્ગલધ્વનન્નૃસિંહ રક્ષ મામ્ ॥ ૩॥

દરિદ્રદેવિ દુષ્ટદૃષ્ટિ દુઃખ દુર્ભરં હરં
    નવગ્રહોગ્રવક્રદોષણાદિવ્યાધિ નિગ્રહમ્ ।
પરૌષધાદિમન્ત્રયન્ત્રતન્ત્રકૃત્રિમંહનં
    અકાલમૃત્યુમૃત્યુમૃત્યુમુગ્રમૂર્તિણં ભજે ॥ ૪॥

જયત્યવક્રવિક્રમક્રમક્રમક્રિયાહરં
    સ્ફુરત્સહસ્રવિસ્ફુલિઙ્ગભાસ્કરપ્રભાગ્રસત્ ।
ધગદ્ધગદ્ધગલ્લસન્મહદ્ભ્રમત્સુદર્શનો-
    ન્મદેભભિત્સ્વરૂપભૃદ્ભવત્કૃપારસામૃતમ્ ॥ ૫॥

વિપક્ષપક્ષરાક્ષસાક્ષમાક્ષરૂક્ષવીક્ષણં
    સદાઽક્ષયત્કૃપાકટાક્ષલક્ષ્મલક્ષ્મિવક્ષસમ્ ।
વિચક્ષણં વિલક્ષણં પ્રતીક્ષણં પરીક્ષણં
    પરીક્ષ દીક્ષ રક્ષ શિક્ષ સાક્ષિણં ક્ષમં ભજે ॥ ૬॥

અપૂર્વ શૌર્ય ધૈર્ય વીર્ય દુર્નિવાર્ય દુર્ગમ-
મકાર્યકૃદ્ધનાર્ય ગર્વપર્વતપ્રહાર્યસત્ ।
પ્રચાર્યસર્વનિર્વહસ્તુપર્યવર્યપર્વિણં
સદાર્યકાર્યભાર્યભૃદ્દુદારવર્યણં ભજે ॥ ૭॥

પ્રપત્તિનાર્દ્રનાભનાભિવન્દનપ્રદક્ષિણા
નતાનનાઙ્ગવાઙ્મનઃસ્મરજ્જપસ્તુવદ્વદા ।
અશ્રુપૂર્ણાર્દ્રપૂર્ણભક્તિપારવશ્યતા
સકૃત્ક્રિયાચરદ્ધ્રુવત્કૃપા નૃસિંહ રક્ષ મામ્ ॥ ૮॥

કરાલવક્ત્ર કર્કશોગ્ર વજ્રદંષ્ટ્રમુજ્જ્વલં
કુઠારખડ્ગકુન્તરોમરાઙ્કુશોન્નખાયુધમ્ ।
મહદ્ભ્રયૂધભગ્નસઞ્ચલજ્ઞતા સટાલકં
જગત્પ્રમૂર્છિતાટ્ટહાસચક્રવર્તિણં ભજે ॥ ૯॥

નવગ્રહાઽપમૃત્યુગણ્ડ વાસ્તુરોગ વૃશ્ચિકા-
-ઽગ્નિ વાડવાગ્નિ કાનનાગ્નિ શતૃમણ્ડલ ।
પ્રવાહ ક્ષુત્પિપાસ દુઃખ તસ્કર પ્રયોગ દુ-
-ષ્પ્રમાદસઙ્કટાત્સદા નૃસિંહ રક્ષ માં પ્રભો ॥ ૧૦॥

ફલશ્રુતિ સમર્પણમ્ ।
ઇદં નૃસિંહ સ્તમ્ભ સમ્ભ વાવતારસંસ્તવં
વરાકલઙ્ક વંશ્ય વેઙ્કટાભિધાન વૈષ્ણવો ।
સમર્પિતોઽસ્મિ સર્વદા નૃસિંહ દાસ્યતેચ્છયા
રમાઙ્ક યાદશૈલનારસિંહ તેઙ્ઘ્રિસન્નિધૌ ॥ ૧૧॥

ઉગ્રં વીરં મહાવિષ્ણું જ્વલન્તં સર્વતોમુખમ્ ।
નૃસિંહં ભીષણં ભદ્રં મૃત્યોર્મૃત્યુર્નમામ્યહમ્ ॥

ઇતિ શ્રીવેઙ્કટરમણાચાર્યવિરચિતં
સ્તમ્ભાવિર્ભાવનરસિંહસ્તોત્રં સમ્પૂર્ણમ્ ।

The text is provided by shrIchakravartula sudhanvAchArya,
the grandson of the composer, Shri Venkataramana

*Shri Stambhavirbhava Narasimha Stotram*

pdf was typeset on April 22, 2021

Please send corrections to *sanskrit@cheerful.com*